निपातनात् सिद्धम् ।) युगपदुपस्थितचरण-
जानुनी । इति व्याकरणम् ॥
पदाङ्कः, पुं (पदस्य अङ्कश्चिह्नम् ।) क्रमाङ्कः । पाद-
चिह्नम् । यथा,—
"शाके शाकवेदशोड़शमिते श्रीकृष्णधर्म्मार्पय-
न्नानन्दप्रदनन्दनन्दनपदद्वन्दारविन्दं हृदि ।
चक्रे लक्ष्मपदाङ्कदूतमतुलं प्रीतिप्रदं शृण्वतां
धीरः श्रीरघुरामरायनृपतेराज्ञां गृहीत्वादरात् ॥
इति पदाङ्कदूतकाव्यम् ॥
पदाङ्गी, स्त्री, (हंसस्य पदमिव अङ्गं यस्याः । स्त्रियां
ङीष् ।) हंसपदी । इति राजनिर्घण्टः ॥
पदाजिः, पुं, (पादाभ्यामजतीति । अज गतौ +
"पादे च ।" उणां । ४।१३१ । इति पादे चोप-
पदे अजेरिण् । "पादस्य पदाज्यातिगोप-
हतेषु ।" ६।३।५२ । इति पदादेशः । बहुल-
वचनात् अजेर्व्यभावः ।) पदातिकः । इत्य-
मरः । २ । ८ । ६६ ॥
पदातः, पुं, (पदाभ्यामततीति । पद् + अत् + अच् ।)
पादातिकः । इति शब्दरत्नावली ॥
पदातिः, पुं, (पादाभ्यामतति गच्छतीति "पादे
च ।" उणां ४।१३१ । इति पाद + अति + इण् ।
"पादस्य पदाज्यातिगोपहतेषु ।' ६।३।५२ ।
इति पदादेशः ।) पदातिकः । पियादा इति
भाषा । तत्पर्य्यायः । पत्तिः २ पतगः ३ पादा-
तिकः ४ पदाजिः ५ पद्गः ६ पदिकः ७ । इत्य-
मरः । २ । ८ । ६६ ॥ पदातिकः ८ पादात् ९
पादाविकः १० पदात् ११ पायिकः १२ शव-
रालिः १३ । इति शब्दरत्नावली ॥ (यथा,
महाभारते । १ । १३९ । ३१ ।
"गजानश्वान् रथांश्चैव पातयामास पाण्डवः ।
पदातींश्च रथांश्चैव न्यवधीदर्ज्जुनाग्रजः ॥")
पदातिकः, पुं, (पदाति + स्वार्थे कन् ।) पदातिः ।
इति शब्दरत्नावली ॥
पदारः, पुं, (पदं ऋच्छति प्राप्नोतीति । ऋ + अण् ।)
पादधूलिः । पादालिन्दः । इति मेदिनी ॥
पदार्थः, पुं, पदानां घटपटादीनां अर्थोऽभिधेयः ।
तत्पर्य्यायः । भावः २ धर्म्मः ३ तत्त्वम् ४ सत्त्वम्
५ वस्तु ६ । इति जटाधरः ॥ * ॥ (पदार्था हि
दर्शनमतभेदेन नानाविधाः । तत्र वैशेषिकाणां
मते ।) सप्त पदार्थाः । यथा,—
"द्रव्यं गुणास्तथा कर्म्म सामान्यं सविशेषकम् ।
समवायस्तथाभावः पदार्थाः सप्त कीर्त्तिताः ॥"
"सप्तानामपि साधर्म्म्यं ज्ञेयत्वादिकमिष्यते ।
द्रव्यादयः पञ्च भावा अनेके समवायिनः ॥
सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः ॥"
इति भाषापरिच्छेदे । २, १४ ॥
"एते पदार्था वैशेषिकप्रसिद्धाः । नैयायिकाना-
मप्यविरुद्धाः ।" इति सिद्धान्तमुक्तावली ॥ गौत-
मोक्तषोड़शपदार्थास्तु न्यायशब्दे द्रष्टव्याः ॥
(कपिलमते प्रकृत्यादयः पञ्चविंशतिः । पातञ्जल-
मते तु ईश्वरेण सह षड्विंशतिः । वेदान्तमते
आत्मानात्मभेदात् द्विविधः । तत्र आत्मापि
द्विविधः ईश्वरजीवाद्युपाधिभेदात् । अनात्मापि
विद्याविद्याभेदेन द्विविधः । केवलमविद्योप-
हितत्वाद्भेदव्यवहारः । अनात्मापि कारण-
सूक्ष्मस्थूलभेदात् त्रिविधः इति ॥)
पदासनं, क्ली, (पदः पादस्य वा आसनम् ।) पाद-
पीठम् । इति हेमचन्द्रः ॥ पा राखा टुल् ।
इति भाषा ॥
पदिकः, पुं, (पादेन चरतीति । पाद + "पर्पादिभ्यः
ष्ठन् ।" ४।४।१० । इति ष्ठन् । ततः पदादेशश्च ।)
पदातिः । इत्यमरः । २ । ८ । ६७ ॥
पद्गः, पुं, (पद्भ्यां गच्छतीति । पत् + गम् + अन्ये-
भ्योऽपीति डः ।) पदातिकः । इत्यमरः । २।८।६७॥
पद्धतिः, पद्धती, } स्त्री, (पद्भ्यां हन्ति गच्छतीति । हन
गतौ + क्तिन् । "हिमकाषिहतिषु
च ।" ६।३।५४ । इति पद्भावः । "बह्वादिभ्यश्च ।"
४।१।४५ । इति वा ङीष् ।) वर्त्म । (यथा, रघुः
३।४६ ।
"पथः श्रुतेर्दर्शयितार ईश्वराः
मलीमसामाददते न पद्धतिम् ॥")
पंक्तिः । इति मेदिनी ॥ ग्रन्थार्थबोधकग्रन्थः ।
इति हेमचन्द्रः ॥ पदवी । सा च घोषवसु-
मित्रादिरूपा । यथा । "षष्ठेऽन्नप्राशनं मासि
यद्वेष्टं मङ्गलं कुले इति मनुवचनात् चूड़ाकार्य्या
यथाकुलमिति याज्ञवल्क्यवचनात् देशानु-
शिष्टं कुलधर्म्ममुख्यं सगोत्रधर्म्मं नहि संत्यजेच्च
इति वामनपुराणाच्च संस्कारमात्रे कुलधर्म्मानु-
रोधेन कालान्तरे मङ्गलविशेषाचरणवत्
शूद्राणां नामकरणे वसुघोषादिरूपपद्धतियुक्त-
नामत्वञ्च बोध्यम् । एवमेव कुल्लूकभट्टः ।" इत्यु-
द्वाहतत्त्वम् ॥
पद्धिमं, क्ली, (पादस्य हिमम् । "हिमकाषिहतिषु
च ।" ६।३।५४ । इति पद्भावः ।) पदस्य शीत-
लता । इति संक्षिप्तसारव्याकरणम् ॥
पद्मं, क्ली पुं, (पद्यते इति । पद गतौ + "अर्त्तिस्तु-
सुहुस्रिति ।" उणां । १ । १३६ । इति मन् ।
यद्वा, पद्मा लक्ष्मीरस्त्यस्मिन् । "अर्श आदि-
भ्योऽच् ।" ५।२।१२७ । इति अच् ।) स्वनाम-
ख्यातपुष्पविशेषः । तत्पर्य्यायः । नलिनम् २
अरविन्दम् ३ महोत्पलम् ४ सहस्रपत्रम् ५
कमलम् ६ शतपत्रम् ७ कुशेशयम् ८ पङ्केरु-
हम् ९ तामरसम् १० सारसम् ११ सरसी-
रुहम् १२ विसप्रसूनम् १३ राजीवम् १४ पुष्क-
रम् १५ अम्भोरुहम् १६ । इत्यमरः । १ । १० ।
३९-४० ॥ पङ्कजम् १७ अम्भोजम् १८ अम्बु-
जम् १९ सरसिजम् २० श्रीवासम् २१ श्रीपर्णम्
२२ इन्दिरालयम् २३ जलेजातम् २४ अजम् २५
कञ्जम् २६ नलम् २७ नालीकम् २८ नालिकम्
२९ वनजम् ३० अब्जानम् ३१ पुटकम् ३२
अब्जः ३३ । इति शब्दरत्नावली ॥ अस्य गुणाः ।
कषायत्वम् । मधुरत्वम् । शीतलत्वम् । पित्त-
कफास्रनाशित्वञ्च । इति राजवल्लभः ॥ अव-
शिष्टम् कमलशब्दे द्रष्टव्यम् ॥ * ॥ पद्मकम् ।
तच्च गजस्य मुखादिस्थो बिन्दुसमूहः । व्यूह-
विशेषः । (यथा, मनुः ७ । १८८ ।
"यतश्च भयमाशङ्केत्ततो विस्तारयेद्बलम् ।
पद्मेन चैव व्यूहेन निविशेत सदा स्वयम्" ॥)
निधिभेदः । (यथा, महाभारते ।२।१०।३६ ।
"निधिप्रवरमुख्यौ च शङ्खपद्मौ धनेश्वरौ ।
सर्व्वान्निधीन् प्रगृह्याथ उपास्तां वै धनेश्वरम्" ॥)
संख्यान्तरम् । तच्च दशार्ब्बुदम् । (यथा, महा-
भारते ।
"अयुतम् प्रयुतञ्चैव पद्मम् खर्व्वमथार्ब्बुदम्" ॥)
दशशङ्खश्च इति मेदिनी ॥ पद्मकाष्ठौषधिः । इति
धरणिः ॥ पुष्करमूलम् । सीसकम् । इति राज-
निर्घण्टः (कल्पविशेषः । यथा, मार्कण्डेये ४७।३॥
"पद्मावसाने प्रलये निशासुप्तोत्थितः प्रभुः ।
सत्त्वोद्रिक्तस्तदा ब्रह्मा शून्यं लोकमवैक्षत" ॥)
शरीरस्थषट्पद्मानि यथा,—
"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके ।
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम् ॥
तदूर्द्ध्वे कामबीजन्तु कलशान्तीन्दुनादकम् ।
तदूर्द्ध्वे तु शिखाकारा कुण्डली ब्रह्मविग्रहा ॥
तद्बाह्ये हेमवर्णाभम् व स-वर्णचतुर्दलम् ।
द्रुतहेमसमप्रख्यं पद्मं तत्र विभावयेत् ॥
तदूर्द्ध्वेऽग्निसमप्रख्यं षड्दलं हीरकप्रभम् ।
वादिलान्तषड्वर्णेन युक्ताधिष्ठानसंज्ञकम् ॥
मूलमाधारषट्कानां मूलाधारं ततो विदुः ॥१॥
स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः ॥२॥
तदूर्द्ध्वे नाभिदेशे तु मणिपूरं महत्प्रभम् ।
मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः ॥
मणिवद्भिन्नं तत् पद्मं मणिपूरं तथोच्यते ।
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम् ॥
शिवेनाधिष्ठितं पद्मं विश्वालोकैककारणम् ॥३॥
तदूर्द्ध्वेऽनाहतं पद्ममुद्यदादित्यसन्निभम् ।
कादिठान्ताक्षरैरर्कपत्रैश्च समधिष्ठितम् ॥
तन्मध्ये बाणलिङ्गन्तु सूर्य्यायुतसमप्रभम् ।
शब्दब्रह्ममयं शब्दोऽनाहतस्तत्र दृश्यते ॥
तेनाहताख्यं पद्मं तन्मुनिभिः परिकीर्त्त्यते ।
आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम् ॥४॥
तदूर्द्ध्वन्तु विशुद्धाख्यं दलषोड़शपङ्कजम् ।
स्वरैः षोड़शकैर्युक्तं धूम्रवर्णं महत्प्रभम् ॥
विशुद्धं तनुते यस्मात् जीवस्य हंसलोकनात् ।
विशुद्धं पद्ममाख्यातमाकाशाख्यं महत् परम् ॥५॥
आज्ञाचक्रं तदूर्द्ध्वे तु आत्मनाधिष्ठितं परम् ।
आज्ञा संक्रमणं तत्र गुरोराज्ञेति कीर्त्तितम् ॥६॥
कैलासाख्यं तदूर्द्ध्वे तु बोधनीन्तु तदूर्द्ध्वतः ।
एवञ्च शिवचक्राणि प्रोक्तानि तव सुव्रत ॥
सहस्रारामुजं बिन्दुस्थानं तदूर्द्ध्वमीरितम् ॥"
इति तन्त्रसारः ॥
पद्मः, पुं, (पद्यते इति । पद गतौ + "अर्त्तिस्तु
स्विति ।" उणां । १।१३६ । इति मन् ।) दाश-
रथिः । नागविशेषः । इति धरणिः ॥ (यथा,
महाभारते ।२।९।८ ।
"कृष्णश्च लोहितश्चैव पद्मश्चित्रश्च वीर्य्यवान् ॥"